**अ.शा. के.मा.शि.बो./अध्यक्ष/2025** **दिनांक :29.01.2025**

## सन्देशः

प्रेयांसः शिक्षकाः अध्येतारश्च !

संस्कृतभाषा भारतस्य सांस्कृतिकभाषा वर्तते। संस्कृतेन विना वेद-पुराण-दर्शनादीनां भारतस्य प्राचीनग्रन्थानाम् अवगमनं सुकरं नास्ति। राष्ट्रियशिक्षानीतौ (एनईपी २०२० इत्यत्र) बहुभाषिकतायाः महत्त्वं सुप्रकटितं वर्तते। अत्र भारतस्य समृद्धसांस्कृतिकपरम्परां संरक्षितुं संस्कृतेन सह अन्याः भाषाः शैक्षिकपाठ्यक्रमे समावेशयितुं निर्देशाः प्रदत्ताः सन्ति। राष्ट्रियशिक्षानीतेः अनुगुणम् इयं संस्कृतशिक्षकप्रशिक्षणपुस्तिका प्रकाश्यमाणा वर्तते।

इयं प्रशिक्षणपुस्तिका शैक्षणिकदृष्टेः, पाठ्यक्रमसमायोजनस्य, व्यावहारिकक्रियाकलापस्य च विषये व्यापकं मार्गदर्शनं प्रददाति। अनया न केवलं भाषासौष्ठवं प्रवर्धते अपितु भाषायाः सांस्कृतिकगहनता ऐतिहासिकमहत्त्वञ्चापि सुस्पष्टं भवति। वयं विद्यालयान्, शिक्षकान् छात्रांश्च प्रोत्साहयामः यत् ते अस्माकं भाषिकसम्पत्संरक्षणाय सोपानरूपेण एतदुपक्रमं परिपालयेयुः।

अस्य महनीयस्य प्रयासस्य कृते प्रशिक्षणैककस्य तत्र सम्बद्धदलस्य च अहं प्रशंसां करोमि।

मङ्गलकामनाः !

(राहुल सिंह)